✧˖°*❋ ❋*°˖✧

# श्री वेंकटेश्वर सुप्रभातम्

# Sri Venkateswara Suprabhatam

✧˖°*❋ ❋*°˖✧

# ॥ श्री वेंकटेश्वर सुप्रभातम् ॥

कौसल्या सुप्रजा राम पूर्वासंध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥ 1 ॥

उत्तिष्ठोत्तिष्ठ गोविंद उत्तिष्ठ गरुडध्वज ।
उत्तिष्ठ कमलाकांत त्रैलोक्यं मंगलं कुरु ॥ 2 ॥

मातस्समस्त जगतां मधुकैटभारेः
वक्षोविहारिणि मनोहर दिव्यमूर्ते ।
श्रीस्वामिनि श्रितजनप्रिय दानशीले
श्री वेंकटेश दयिते तव सुप्रभातम् ॥ 3 ॥

तव सुप्रभातमरविंद लोचने
भवतु प्रसन्नमुख चंद्रमंडले ।
विधि शंकरेंद्र वनिताभिरर्चिते
वृश शैलनाथ दयिते दयानिधे ॥ 4 ॥

अत्र्यादि सप्त ऋषयस्समुपास्य संध्यां
आकाश सिंधु कमलानि मनोहराणि ।
आदाय पादयुग मर्चयितुं प्रपन्नाः
शेषाद्रि शेखर विभो तव सुप्रभातम् ॥ 5 ॥

पंचाननाब्ज भव षण्मुख वासवाद्याः
त्रैविक्रमादि चरितं विबुधाः स्तुवंति ।
भाषापतिः पठति वासर शुद्धि मारात्
शेषाद्रि शेखर विभो तव सुप्रभातम् ॥ 6 ॥

ईशत्-प्रफुल्ल सरसीरुह नारिकेल
पूगद्रुमादि सुमनोहर पालिकानाम् ।
आवाति मंदमनिलः सहदिव्य गंधैः
शेषाद्रि शेखर विभो तव सुप्रभातम् ॥ 7 ॥

उन्मील्यनेत्र युगमुत्तम पंजरस्थाः
पात्रावसिष्ट कदली फल पायसानि ।
भुक्त्वाः सलील मथकेलि शुकाः पठंति
शेषाद्रि शेखर विभो तव सुप्रभातम् ॥ 8 ॥

तंत्री प्रकर्ष मधुर स्वनया विपंच्या
गायत्यनंत चरितं तव नारदोऽपि ।
भाषा समग्र मसत्-कृतचारु रम्यं
शेषाद्रि शेखर विभो तव सुप्रभातम् ॥ 9 ॥

भृंगावली च मकरंद रसानु विद्ध
झुंकारगीत निनदैः सहसेवनाय ।
निर्यात्युपांत सरसी कमलोदरेभ्यः
शेषाद्रि शेखर विभो तव सुप्रभातम् ॥ 10 ॥

योषागणेन वरदध्नि विमथ्यमाने
घोषालयेषु दधिमंथन तीव्रघोषाः ।
रोषात्कलिं विदधते ककुभश्च कुंभाः
शेषाद्रि शेखर विभो तव सुप्रभातम् ॥ 11 ॥

पद्मेशमित्र शतपत्र गतालिवर्गाः
हर्तुं श्रियं कुवलयस्य निजांगलक्ष्म्याः ।
भेरी निनादमिव भिभ्रति तीव्रनादम्
शेषाद्रि शेखर विभो तव सुप्रभातम् ॥ 12 ॥

श्रीमन्नभीष्ट वरदाखिल लोक बंधो
श्री श्रीनिवास जगदेक दयैक सिंधो ।
श्री देवता गृह भुजांतर दिव्यमूर्ते
श्री वेंकटाचलपते तव सुप्रभातम् ॥ 13 ॥

श्री स्वामि पुष्करिणिकाप्लव निर्मलांगाः
श्रेयार्थिनो हरविरिंचि सनंदनाद्याः ।
द्वारे वसंति वरनेत्र हतोत्त मांगाः

श्री वेंकटाचलपते तव सुप्रभातम् ॥ 14 ॥

श्री शेषशैल गरुडाचल वेंकटाद्रि
नारायणाद्रि वृषभाद्रि वृषाद्रि मुख्याम् ।
आख्यां त्वदीय वसते रनिशं वदंति
श्री वेंकटाचलपते तव सुप्रभातम् ॥ 15 ॥

सेवापराः शिव सुरेश कृशानुधर्म
रक्षोंबुनाथ पवमान धनाधि नाथाः ।
बद्धांजलि प्रविलसन्निज शीर्षदेशाः
श्री वेंकटाचलपते तव सुप्रभातम् ॥ 16 ॥

धाटीषु ते विहगराज मृगाधिराज
नागाधिराज गजराज हयाधिराजाः ।
स्वस्वाधिकार महिमाधिक मर्थयंते
श्री वेंकटाचलपते तव सुप्रभातम् ॥ 17 ॥

सूर्येंदु भौम बुधवाक्पति काव्यशौरि
स्वर्भानुकेतु दिविशत्-परिशत्-प्रधानाः ।
त्वद्दासदास चरमावधि दासदासाः
श्री वेंकटाचलपते तव सुप्रभातम् ॥ 18 ॥

तत्-पादधूलि भरित स्फुरितोत्तमांगाः
स्वर्गापवर्ग निरपेक्ष निजांतरंगाः ।
कल्पागमा कलनयाऽऽकुलतां लभंते
श्री वेंकटाचलपते तव सुप्रभातम् ॥ 19 ॥

त्वद्गोपुराग्र शिखराणि निरीक्षमाणाः
स्वर्गापवर्ग पदवीं परमां श्रयंतः ।
मर्त्या मनुष्य भुवने मतिमाश्रयंते
श्री वेंकटाचलपते तव सुप्रभातम् ॥ 20 ॥

श्री भूमिनायक दयादि गुणामृताब्दे
देवादिदेव जगदेक शरण्यमूर्ते ।
श्रीमन्ननंत गरुडादिभि रर्चितांघ्रे
श्री वेंकटाचलपते तव सुप्रभातम् ॥ 21 ॥

श्री पद्मनाभ पुरुषोत्तम वासुदेव
वैकुंठ माधव जनार्धन चक्रपाणे ।
श्री वत्स चिह्न शरणागत पारिजात
श्री वेंकटाचलपते तव सुप्रभातम् ॥ 22 ॥

कंदर्प दर्प हर सुंदर दिव्य मूर्ते
कांता कुचांबुरुह कुट्मल लोलदृष्टे ।
कल्याण निर्मल गुणाकर दिव्यकीर्ते
श्री वेंकटाचलपते तव सुप्रभातम् ॥ 23 ॥

मीनाकृते कमठकोल नृसिंह वर्णिन्
स्वामिन् परश्वथ तपोधन रामचंद्र ।
शेषांशराम यदुनंदन कल्किरूप
श्री वेंकटाचलपते तव सुप्रभातम् ॥ 24 ॥

एलालवंग घनसार सुगंधि तीर्थं
दिव्यं वियत्सरिति हेमघटेषु पूर्णम् ।
धृत्वाद्य वैदिक शिखामणयः प्रहृष्टाः
तिष्ठंति वेंकटपते तव सुप्रभातम् ॥ 25 ॥

भास्वानुदेति विकचानि सरोरुहाणि
संपूरयंति निनदैः ककुभो विहंगाः ।
श्रीवैष्णवाः सतत मर्थित मंगलास्ते
धामाश्रयंति तव वेंकट सुप्रभातम् ॥ 26 ॥

ब्रह्मादय-स्सुरवरा-स्समहर्षयस्ते
संतस्सनंदन-मुखास्त्वथ योगिवर्याः ।
धामांतिके तव हि मंगलवस्तुहस्ताः
श्री वेंकटाचलपते तव सुप्रभातम् ॥ 27 ॥

लक्ष्मीनिवास निरवद्य गुणैक सिंधो
संसारसागर समुत्तरणैक सेतो ।
वेदांत वेद्य निजवैभव भक्त भोग्य
श्री वेंकटाचलपते तव सुप्रभातम् ॥ 28 ॥

इत्थं वृषाचलपतेरिह सुप्रभातं
ये मानवाः प्रतिदिनं पठितुं प्रवृत्ताः ।
तेषां प्रभात समये स्मृतिरंगभाजां
प्रज्ञां परार्थ सुलभां परमां प्रसूते ॥ 29 ॥

✧ₓ┈┈°*❋ ❋*°┈┈ₓ✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net